# Lingashtakam Lyrics in Hindi

ब्रह्ममुरारि सुरार्चिता लिङ्गम्
निर्मलभासित शोभित लिङ्गम् |
जन्मज दुख विनाशक लिङ्गम्
तत् प्रणमामि सदा शिव लिङ्गम् ||१||

देवमुनि प्रवरार्चित लिङ्गम्
कामदहन करुणाकर लिङ्गम् |
रावण दर्प विनाशन लिङ्गम्
तत् प्रणमामि सदा शिव लिङ्गम् ||२||

सर्व सुगन्ध सुलेपित लिङ्गम्
बुद्धि विवर्धन कारण लिङ्गम् |
सिद्ध सुरासुर वन्दित लिङ्गम्
तत् प्रणमामि सदा शिव लिङ्गम् ||३||

कनक महामणि भूषित लिङ्गम्
फणिपति वेष्टित शोभित लिङ्गम् |
दक्ष सुयज्ञ विनाशन लिङ्गम्
तत् प्रणमामि सदा शिव लिङ्गम् ||४||

कुङ्कुम चन्दन लेपित लिङ्गम्
पङ्कज हार सुशोभित लिङ्गम् |
सञ्चित पाप विनाशन लिङ्गम्
तत् प्रणमामि सदा शिव लिङ्गम् ||५||

देवगणार्चित सेवित लिङ्गम्
भवैर्भक्ति भिरेव च लिङ्गम् |
दिनकर कोटि प्रभाकर लिङ्गम्
तत् प्रणमामि सदा शिव लिङ्गम् ||६||

अष्टदलोपरिवेष्टित लिङ्गम्
सर्व समुद्भव कारण लिङ्गम् |
अष्टदरिद्र विनाशन लिङ्गम्
तत् प्रणमामि सदा शिव लिङ्गम् ||७||

सुरगुरु सुरवर पूजित लिङ्गम्
सुरवन पुष्प सदार्चित लिङ्गम् |

परात्परं परमात्मक लिङ्गम्
तत् प्रणमामि सदा शिव लिङ्गम् ||८||

लिङ्गाष्टकमिदं पुण्यं यः पठेत् शिव सन्निधौ |
शिवलोकमवाप्नोति शिवेन सह मोदति ||